विरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते एवं दुःखोपष्टम्भकप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति"।

दुःखादीनाञ्च सा॰ प्र॰ भा॰ विषयगतत्वं यद्दर्शितं तच्च आनन्दशब्दे ७२२ पृ॰ दृश्यम् "प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यवैधर्म्यम्" सा॰ सू॰

"गुणानां सत्वादिद्रव्यत्रयाणामन्योऽन्यं सुखदुःखविषादाद्यैः साधर्म्यं कार्येषु तद्दर्शनादित्यर्थः। मोहादिकं च घटादेरपि रूपादिवदेव धर्मोऽन्तःकरणोपादानत्वादन्यकार्याणामित्युक्तम्। सत्वादिशब्दार्थास्तु पञ्चशिखाचार्य्यैरुक्ताः यथा "सत्वं नाम प्रसादलाघवाभिष्वङ्गप्रीतितितिक्षासन्तोषादिरूपानन्तभेदं समासतः सुखात्मकम्। एवं रजोऽपि शोकादिनानाभेदं समासतो दुःखात्मकम्" सा॰ प्रवचनभाष्यम्।

दुःखस्य चित्तवृत्तिविशेषरूपत्वम् शङ्करभाष्ये उक्तम् तच्च अज्ञानशब्दे ६४२ पृ॰ दर्शितम्।

कविकल्पलतायाञ्च लोकसिद्धानि कतिचित् दुःखकारणानि दर्शितानि यथा

पारतन्त्र्यं१ आधिः२ व्याधिः३ मानच्युतिः४ शत्रुः५ कुभार्य्या६ नैःस्वम्७ कुग्रामवासः८ कुस्वामिसेवनम्९ बहुकन्याः१० वृद्धत्वं११ परगृहवासः१२ वर्षाप्रवासः१३ भार्य्याद्वयम्१४ कुभृत्यः१५ दुर्बलकरणकक्षिः१६

वराहपुराणे दुःखतराणि कतिचिदुक्तानि यथा

"दुःखमेव प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!। उचितेनोपचारेण दुःखं मोक्षविनाशनम्। अहङ्कारस्ततो नित्यं नरा मोहेन चावृताः। ये मां नैव प्रपद्यन्ते ततो दुःखतरन्नु किम्। सर्वाशी सर्वविक्रेता नमस्कारविवर्जितः। ये च मां न प्रपद्यन्ते ततो दुःखतरन्नु किम्। सर्वान्नानि तु सिद्धानि पाकभेदन्तु कारयेत्। अवैश्वदेवं योऽश्नाति ततो दुःखतरन्नु किम्। प्राप्तकाले वैश्वदेवे दृष्ट्वा ह्यतिथिमागतम्। अदत्त्वा तस्य यो भुङ्क्ते ततो दुःखतरन्नु किम्। असन्तुष्टस्तु वैषम्ये परदाराभिमर्दकः। परोपतापी मन्दात्मा ततो दुःखतरन्नु किम्। अकृत्वायुर्बलं कर्म्म गृहे संवसते नरः। मृत्युकालवशं प्राप्तस्ततो दुःखतरन्नु किम्। हस्त्यश्वरथयानानि गच्छमानानि पश्यति। न वै तस्याप्यतः पृष्ठे ततो दुःखतरन्नु किम्। अश्नन्ति पिशितं केचित् घृतशालिसमन्वितम्। शुष्कान्नं केचिदश्नन्ति ततो दुःखतरन्नु किम्। वरवस्त्रावृतां शय्यां समासेवन्ति भूषिताः। केचित् तृणेषु शेरन्ते ततो दुःखतरन्नु किम्। विद्वान् कृती गुणज्ञश्च सर्वशास्त्रविशारदः। केचिन्मूकाश्च दृश्यन्ते ततो दुःखतरन्नु किम्। विद्यमाने धने केचित् कृपणा भोगवर्जिताः। दरिद्रो जायते दाता ततो दुःखतरन्नु किम्। पुरुषस्य तु द्वे भार्ये तयोरेकां प्रशंसेत्। एकापि दुर्भगा तत्र ततो दुःखतरन्नु किम्। लब्ध्वा तु मानसीं संज्ञां पञ्चभूतसमन्विताम्। मामेव न प्रपद्यन्ते ततो दुःखतरन्नु किम्। लब्ध्वा ब्राह्मणभावन्तु त्रयो वर्णाः सुमध्यमे!। पापकर्म्मरता ह्यासंस्ततो दुःखतरन्नु किम्। एतत्ते कथितं भद्रे! दुःखकर्म्म विनिश्चितम्। सर्वभूतहितार्थाय यत्त्वया परिपृच्छ्यते"। "अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः। निन्दन्तस्तव सामर्थ्यं ततो दुःखतरन्नु किम्" गीता। "मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति" माघः। "सुखं हि दुःखान्यनुभूय शोभते" मृच्छ॰। दुःखमनुभवति दुःख+क्यङ् दुःखायते दुखमनुभवतीत्यर्थः। "दुःखायते जनः सर्वः सएवैकः सुखायते" भट्टिः।

**दुःखग्राम** पु॰ दुःखानां ग्रामोऽत्र। १संसारे शब्दार्थचि॰। ६त॰। २दुःखसमुदाये च।

**दुःखजात** त्रि॰ जातं दुःखमस्य परनि॰। संजातदुःखे "जातिकालसुखादिभ्यः" इत्यादिना पा॰अस्यान्तोदात्तता ६त॰। २दुःखसमुदाये न॰।

**दुःखत्रय** न॰ ६त॰। आध्यात्मिकाधिभौतिकाधिदैविकरूपे दुःखत्रिके दुःखशब्दे सा॰का॰ त॰कौ॰वाक्यं दृश्यम्।

**दुःखदिर** पु॰ दुष्टः खदिरः वा षत्वम्। मङ्गसारे खदिरभेदे शब्दार्थचि॰। [हेमच॰।

**दुःखदोह्या** स्त्री दुःखेन दोह्या। दुःखेन दोह्यायां गवि।

**दुःखशील** त्रि॰ दुःखं शीलयति शील--अण् उप॰। दुःखानुभवशीलनकर्त्तरि "कामैकपत्नी व्रतदुःखशीलाम्" कुमा॰।

**दुःखित** त्रि॰ दुःख+तार॰ इतच्। संजातदुःखे "दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः" मनुः।

**दुःखिन्** त्रि॰ दुःख+सुखा॰ मत्वर्थे इनि। दुःखान्विते

**दुःशकुन** न॰दुष्टं शकुनं वा रोः शः। अशुभसूचके निमित्तभेदे "वन्ध्याचर्मतुषास्थि सर्पलवणाङ्गारेन्धनक्लीवविट्तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः नग्नाभ्यक्तविमुक्तकेशपतित व्यङ्गक्षुधार्त्ता असृक् स्त्रीपुष्पं शरटः स्वगेहदहनं मार्जारयुद्धं क्षुतम्। काषायी गुड़-